सांबपंचाशिका

सांबपंचाशिका

पुष्णन् देवानमृतविसरैरिंदुमास्राव्य सम्यग्
भाभिः स्वाभी रसयति रसं यः परं नित्यमेव |
क्षीणं क्षीणं पुनरपि च तं पूरयत्येवमीदृग्
दोलालीलोल्लसितहृदयं नौमि चिद्भानुमेकं ||

शब्दार्थत्वविवर्तमानपरमज्योतीरुचो गोपते-
-रुद्गीथोऽभ्युदितः पुरोऽरुणतया यस्य त्रयीमंडलं |
भास्यद्वर्णपदक्रमेरिततमः सप्तस्वराश्चैर्विय-
-द्विद्यास्यंदनमुन्नयन्निव नमस्तस्मै परब्रह्मणे || 1 ||

ओमित्यंतर्नदति नियतं यः प्रतिप्राणि शब्दो
वाणी यस्मात्प्रसरति परा शब्दतन्मात्रगर्भा |
प्राणापानौ वहति च समौ यो मिथो ग्राससक्तौ
देहस्थं तं सपदि परमादित्यमाद्यं प्रपद्ये || 2 ||

यस्त्वक्चक्षुःश्रवणरसनाघ्राणपाण्यंघ्रिवाणी-
-पायूपस्थस्थितिरपि मनोबुद्ध्यहंकारमूर्तिः |
तिष्ठत्यंतर्बहिरपि जगद्भासयंद्वादशात्मा
मार्तंडं तं सकलकरणाधारमेकं प्रपद्ये || 3 ||

या सा मित्रावरुणसदनादुच्चरंतो त्रिषष्टिं
वर्णानत्र प्रकटकरणैः प्राणसंगात्प्रसूतान् |
तां पश्यंतीं प्रथममुदितां मध्यमां बुद्धिसंस्थां
वाचं वक्त्रे करणविशदां वैखरीं च प्रपद्ये || 4 ||

ऊर्ध्वाधःस्थान्यतनुभुवनान्यंतरा संनिविष्टा
नानानाडिप्रसवगहना सर्वभूतांतरस्था |
प्राणापानग्रसननिरतैः प्राप्यते ब्रह्मनाडी
सा नः श्वेता भवतु परमादित्यमूर्तिः प्रसन्ना || 5 ||

न ब्रह्मांडव्यवहितपथा नातिशीतोष्णरूपा
नो वा नक्तंदिवगममिताऽतापनीयापराहुः |
वैकुंठीया तनुरिव रवे राजते मंडलस्था
सा नः श्वेता भवतु परमादित्यमूर्तिः प्रसन्ना || 6 ||

यत्रारूढं त्रिगुणवपुषि ब्रह्म तद्बिंदुरूपं
योगींद्राणां यदपि परमं भाति निर्वाणमार्गः |
त्रय्याधारः प्रणव इति यन्मंडलं चंडरश्मे-
-रंतः सूक्ष्मं बहिरपि बृहन्मुक्तयेऽहं प्रपन्नः || 7 ||

यस्मिन्सोमः सुरपितृनरैरन्वहं पीयमानः
क्षीणः क्षीणः प्रविशति यतो वर्धते चापि भूयः |
यस्मिन्वेदा मधुनि सरघाकारवद्भांति चाग्रे
तच्चंडांशोरमितममृतं मंडलस्थं प्रपद्ये || 8 ||

ऐंद्रीमाशां पृथुकवपुषा पूरयित्वा क्रमेण
क्रांताः सप्त प्रकटहरिणा येन पादेन लोकाः |
कृत्वा ध्वांतं विगलितबलिव्यक्ति पाताललीनं
विश्वालोकः स जयति रविः सत्त्वमेवोर्ध्वरश्मिः || 9 ||

ध्यात्वा ब्रह्म प्रथममतनु प्राणमूले नदंतं
दृष्ट्वा चांतः प्रणवमुखरं व्याहृतीः सम्यगुक्त्वा |
यत्तद्वेदे तदिति सवितुर्ब्रह्मणोक्तं वरेण्यं
तद्भर्गाख्यं किमपि परमं धामगर्भं प्रपद्ये || 10 ||

त्वां स्तोष्यामि स्तुतिभिरिति मे यस्तु भेदग्रहोऽयं
सैवाविद्या तदपि सुतरां तद्विनाशाय युक्तः |
स्तौम्येवाहं त्रिविधमुदितं स्थूलसूक्ष्मं परं वा
विद्योपायः पर इति बुधैर्गीयते खल्वविद्या || 11 ||

योऽनाद्यंतोऽप्यतनुरगुणोऽणोरणीयान्महीया-
-न्विश्वाकारः सगुण इति वा कल्पनाकल्पितांगः |
नानाभूतप्रकृतिविकृतीर्दर्शयन्भाति यो वा
तस्मै तस्मै भवतु परमादित्य नित्यं नमस्ते || 12 ||

तत्त्वाख्याने त्वयि मुनिजनाः नेति नेति ब्रुवंतः
श्रांताः सम्यक्त्वमिति न च तैरीदृशो वेति चोक्तः |
तस्मात्तुभ्यं नम इति वचोमात्रमेवास्मि वच्मि
प्रायो यस्मात्प्रसरति तरां भारती ज्ञानगर्भा || 13 ||

सर्वांगीणः सकलवपुषामंतरे योऽंतरात्मा
तिष्ठन्काष्ठे दहन इव नो दृश्यसे युक्तिशून्यैः |
यश्च प्राणारणिषु नियतैर्मथ्यमानासु सद्भि-
-र्दृश्यं ज्योतिर्भवसि परमादित्य तस्मै नमस्ते || 14 ||

स्तोता स्तुत्यः स्तुतिरिति भवान्कर्तृकर्मक्रियात्मा
क्रीडत्येकस्तव नुतिविधावस्वतंत्रस्ततोऽहं |
यद्वा वच्मि प्रणयसुभगं गोपते तच्च तथ्यं
त्वत्तो ह्यन्यत्किमिव जगतां विद्यते तन्मृषा स्यात् || 15 ||

ज्ञानं नांतःकरणरहितं विद्यतेऽस्मद्विधानां
त्वं चात्यंतं सकलकरणागोचरत्वादचिंत्यः |
ध्यानातीतस्त्वमिति न विना भक्तियोगेन लभ्य-
-स्तस्माद्भक्तिं शरणममृतप्राप्तयेऽहं प्रपन्नः || 16 ||

हार्दं हंति प्रथममुदिता या तमः संश्रितानां
सत्त्वोद्रेकात्तदनु च रजः कर्मयोगक्रमेण |
स्वभ्यस्ता च प्रथयतितरां सत्त्वमेव प्रपन्ना
निर्वाणाय व्रजति शमिनां तेऽर्क भक्तिस्त्रयीव || 17 ||

तामासाद्य श्रियमिव गृहे कामधेनुं प्रवासे
ध्वांते भातिं धृतिमिव वने योजने ब्रह्मनाडिं |
नावं चास्मिन्विषमविषयग्राहसंसारसिंधौ
गच्छेयं ते परममृतं यन्न शीतं न चोष्णं || 18 ||

अग्नीषोमावखिलजगतः कारणं तौ मयूखैः
सर्गादाने सृजसि भगवन्ह्रासवृद्धिक्रमेण |
तावेवांतर्विषुवति समौ जुह्वतामात्मवह्नौ
द्वावप्यस्तं नयसि युगपन्मुक्तये भक्तिभाजां || 19 ||

स्थूलत्वं ते प्रकृतिगहनं नैव लक्ष्यं ह्यनंतं
सूक्ष्मत्वं वा तदपि सदसद्व्यक्त्यभावादचिंत्यं |
ध्यायामीत्थं कथमविदितं त्वामनाद्यंतमंत-
-स्तस्मादर्क प्रणयिनि मयि स्वात्मनैव प्रसीद || 20 ||

यत्तद्वेद्यं किमपि परमं शब्दतत्त्वं त्वमंत-
-स्तत्सद्व्यक्तिं जिगमिषु शनैर्लाति मात्रा कलाः खे |
अव्यक्तेन प्रणववपुषा बिंदुनादोदितं स-
-च्छब्दब्रह्मोच्चरति करणव्यंजितं वाचकं ते || 21 ||

प्रातःसंध्यारुणकिरणभागृङ्ग्यं राजसं य-
-न्मध्ये चापि ज्वलदिव यजुः शुक्लभाः सात्त्विकं वा |
सायं सामास्तमितकिरणं यत्तमोल्लासि रूपं
साह्नः सर्गस्थितिलयविधावाकृतिस्ते त्रयीव || 22 ||

ये पातालोदधिमुनिनगद्वीपलोकाधिबीज-
-च्छंदोभूतस्वरमुखनदत्सप्तसप्तिं प्रपन्नाः |
ये चैकाश्वं निरवयववाग्भावमात्राधिरूढं
ते त्वामेव स्वरगुणकलावर्जितं यांत्यनश्वं || 23 ||

दिव्यं ज्योतिः सलिलपवनैः पूरयित्वा त्रिलोकी-
-मेकीभूतं पुनरपि च तत्सारमादाय गोभिः |
अंतर्लीनो विशसि वसुधां तद्गतः सूयसेऽन्नं
तच्च प्राणांस्त्वमिति जगतां प्राणभृत्सूर्य आत्मा || 24 ||

अग्नीषोमौ प्रकृतिपुरुषौ बिंदुनादौ च नित्यौ
प्राणापानावपि दिननिशे ये च सत्यानृते द्वे |
धर्माधर्मौ सदसदुभयं योऽंतरावेश्य योगी
वर्तेतात्मन्युपरतमतिर्निर्गुणं त्वां विशेत्सः || 25 ||

गर्भाधानप्रसवविधये सुप्तयोरिंदुभासा
सापत्न्येनाभिमुखमिव खे कांतयोर्मध्यसंस्थः |
द्यावापृथ्व्योर्वदनकमले गोमुखैर्बोधयित्वा
पर्यायेणापिबसि भगवन् षड्रसास्वादलोलः || 26 ||

सोमं पूर्णामृतमिव चरुं तेजसा साधयित्वा
कृत्वा तेनानलमुखजगत्तर्पणं वैश्वदेवं |
आमावस्यं विघसमिव खे तत्कलाशेषमश्नन्
ब्रह्मांडांतर्गृहपतिरिव स्वात्मयागं करोषि || 27 ||

कृत्वा नक्तंदिनमिव जगद्बीजमाव्यक्तिकं य-
-त्तत्रैवांतर्दिनकर तथा ब्राह्ममन्यत्ततोऽल्पं |
दैवं पित्र्यं क्रमपरिगतं मानुषं चाल्पमल्पं
कुर्वन्ककुर्वन्कलयसि जगत्पंचधावर्तनाभिः || 28 ||

तत्त्वालोके तपन सुदिने ये परं संप्रबुद्धाः
ये वा चित्तोपशमरजनीयोगनिद्रामुपेताः |
तेऽहोरात्रोपरमपरमानंदसंध्यासु सौरं
भित्त्वा ज्योतिः परमपरमं यांति निर्वाणसंज्ञं || 29 ||

आब्रह्मेदं नवमिव जगज्जंगमस्थावरांतं
सर्गे सर्गे विसृजसि रवे गोभिरुद्रिक्तसोमैः |
दीप्तैः प्रत्याहरसि च लये तद्यथायोनि भूयः
सर्गांतादौ प्रकटविभवां दर्शयन्नश्मिलीलां || 30 ||

श्रित्वा नित्योपचितमुचितं ब्रह्मतेजः प्रकाशं
रूपं सर्गस्थितिलयमुचा सर्वभूतेषु मध्ये |
अंतेवासिष्विव सुगुरुणा यः परोक्षः प्रकृत्या
प्रत्यक्षोऽसौ जगति भवता दर्शितः स्वात्मनात्मा || 31 ||

लोकाः सर्वे वपुषि नियतं ते स्थितास्त्वं च तेषा-
-मेकैकस्मिन्युगपदगुणो विश्वहेतोर्गुणीव |
इत्थंभूते भवति भगवन्न त्वदन्योऽस्मि सत्यं
किं तु ज्ञस्त्वं परमपुरुषोऽहं प्रकृत्यैव चाज्ञः || 32 ||

संकल्पेच्छाद्यखिलकरणप्राणवाण्यो वरेण्याः
संपन्ना मे त्वदभिनवनाज्जन्म चेदं शरण्यं |
मन्ये चास्तं जिगमिषु शनैः पुण्यपापद्वयं त-
-द्भक्तिश्रद्धे तव चरणयोरन्यथा नो भवेतां || 33 ||

सत्यं भूयो जननमरणे त्वत्प्रपन्नेषु न स्त-
-स्तत्राप्येकं तव नुतिफलं जन्म याचे तदित्थं |
त्रैलोक्येशः शम इव परः पुण्यकायोऽप्ययोनिः
संसाराब्धौ प्लव इव जगत्तारणाय स्थिरः स्यां || 34 ||

सौषुम्णेन त्वममृतपथेनैत्य शीतांशुभावं
पुष्णास्यग्रे सुरनरपितॄन् शांतभाभिः कलाभिः |
पश्चादंभो विशसि विविधाश्चौषधीस्तद्गतोऽपि
प्रीणास्येवं त्रिभुवनमतस्ते जगन्मित्रतार्क || 35 ||

मंदाक्रांते तमसि भवता नाथ दोषावसाने
नांतर्लीना मम मतिरियं गाढनिद्रां जहाति |
तस्मादस्तंगमिततमसा पद्मिनीवात्मभासा
सौरीत्येषा दिनकर परं नीयतामाशु बोधं || 36 ||

येन ग्रासीकृतमिव जगत्सर्वमासीत्तदस्तं
ध्वांतं नीत्वा पुनरपि विभो तद्द्याघ्रातचित्तः |
धत्से नक्तंदिनमपि गती शुक्लकृष्णे विभज्य
त्राता तस्माद्भव परिभवे दुष्कृते मेऽपि भानो || 37 ||

आसंसारोपचितसदसत्कर्मबंधाश्रिताना-
-माधिव्याधिप्रजनमरणक्षुत्पिपासार्दितानां |
मिथ्याज्ञानप्रबलतमसा नाथ चांधीकृतानां
त्वं नस्त्राता भव करुणया यत्र तत्र स्थितानां || 38 ||

सत्यासत्यस्खलितवचसां शौचलज्जोज्झिताना-
-मज्ञानानामफलसफलप्रार्थनाकातराणां |
सर्वावस्थास्वखिलविषयाभ्यस्तकौतूहलानां
त्वं नस्त्राता भव पितृतया भोगलोलार्भकाणां || 39 ||

यावद्देहं जरयति जरा नांतकादेत्य दूती
नो वा भीमस्त्रिफणभुजगाकारदुर्वारपाशः |
गाढं कंठे लगति सहसा जीवितं लेलिहान-
-स्तावद्भक्ताभयद सदयं श्रेयसे नः प्रसीद || 40 ||

विश्वप्राणग्रसनरसनाटोपकोपप्रगल्भं
मृत्योर्वक्त्रं दहननयनोद्दामदंष्ट्राकरालं |
यावदृष्ट्वा व्रजति न भिया पंचतामेष काय-
-स्तावन्नित्यामृतमय रवे पाहि नः कांदिशीकान् || 41 ||

शब्दाकारं वियदिव वपुस्ते यजुःसामधाम्नः
सप्तच्छंदांस्यपि च तुरगा ऋङ्मयं मंडलं च |
एवं सर्वश्रुतिमयतया मद्दयानुग्रहाद्वा
क्षिप्रं मत्तः कृपणकरुणाक्रंदमाकर्णयेमं || 42 ||

नाशं नास्मच्चरणशरणा यांत्यपि ग्रस्यमाना
देवैरित्थं सितमिव यशो दर्शयन्स्वं त्रिलोक्यां |
मन्ये सोमं क्षततनुममागर्भवृद्ध्या विवस्वन्
शुक्लच्छायां नयसि शनकैः स्वां सुषुम्णांशुभासा || 43 ||

आस्तां जन्मप्रभृति भवतः सेवनं तद्धि लोके
वाच्यं केनापरिमितफलं भुक्तिमुक्तिप्रकारं |
ज्योतिर्मात्रं स्मृतिपथमितो जीवितांतेऽपि भास्व-
-न्निर्वाणाय प्रभवसि सतां तेन ते कः समोऽन्यः || 44 ||

अप्रत्यक्षत्रिदशभजनाद्यत्परोक्षं फलं त-
-त्पुंसां युक्तं भवति हि समं कारणेनैव कार्यं |
प्रत्यक्षस्त्वं सकलजगतां यत्समक्षं फलं मे
युष्मद्भक्तेः समुचितमतस्तत्तु याचे यथा त्वां || 45 ||

ये चारोग्यं दिशति भगवान्सेवितोऽप्येवमाहु-
-स्ते तत्त्वज्ञा जगति सुभगा भोगयोगप्रधानाः |
भुक्तेर्मुक्तेरपि च जगतां यच्च पूर्णं सुखानां
तस्यान्योऽर्कादमृतवपुषः को हि नामास्तु दाता || 46 ||

हित्वा हित्वा गुरुचपलतामप्यनेकान्निजार्था-
-न्यैरेकार्थीकृतमिव भवत्सेवनं मत्प्रियार्थं |
तेषामिच्छाम्युपकृतिमहं स्वेंद्रियाणां प्रियाणा-
-मादौ तस्मान्मम दिनपते देहि तेभ्यः प्रसादं || 47 ||

किं तन्नामोच्चरति वचनं यस्य नोच्चारकस्त्वं
किं तद्वाच्यं सकलवचसां विश्वमूर्ते न यत्त्वं |
तस्मादुक्तं यदपि तदपि त्वन्नुतौ भक्तियोगा-
-दस्माभिस्तद्भवतु भगवंस्त्वत्प्रसादेन धन्यं || 48 ||

या पंथानं दिशति शिशिराद्युत्तरं देवयानं
या वा कृष्णं पितृपथमथो दक्षिणं प्रावृडाद्यं |
ताभ्यामन्या विषुवदभिजिन्मध्यमा कृत्यशून्या
धन्या काश्चित्प्रकृतिपुरुषावंतरा मेऽस्तु वृत्तिः || 49 ||

स्थित्वा किंचिन्मन इव पिबन्सेतुबंधस्य मध्ये
प्राप्योपेयं ध्रुवपदमथो व्यक्तमुद्दाल्य तालु |
सत्यादूर्ध्वं किमपि परमं व्योम सोमाग्निशून्यं
गच्छेयं त्वां सुरपितृगती चांतरा ब्रह्मभूतः || 50 ||

सर्वात्मत्वं सवितुरिति यो वाङ्मनःकायबुद्ध्या
रागद्वेषोपशमसमतायोगमेवारुरुक्षुः |
धर्माधर्मग्रसनरशनामुक्तये युक्तियुक्तां
स श्रीसांबः स्तुतिमिति रवेः स्वप्रशांतां चकार || 51 ||

भक्तिश्रद्धाद्यखिलतरुणीवल्लभेनेदमुक्तं
श्रीसांबेन प्रकटगहनं स्तोत्रमध्यात्मगर्भं |
यः सावित्रं पठति नियतं स्वात्मवत्सर्वलोका-
-न्पश्यन्सोऽंते व्रजति शुकवन्मंडलं चंडरश्मेः || 52 ||

इति परमरहस्यश्लोकपंचाशदेषा
तपननवनपुण्या सागमब्रह्मचर्चा |
हरतु दुरितमस्मद्वर्णिताकर्णिता वो
दिशतु च शुभसिद्धिं मातृवद्भक्तिभाजां || 53 ||

श्रीस्वात्मसंविदभिन्नरूपशिवार्पणमस्तु |
समाप्तं चेदं सांबपंचाशिकाशास्त्रं ||

इति सांबप्रणीता सांबपंचाशिका संपूर्णा ||